यथा नान्यस्य भूर्लोके पाताले वापि पन्नग ! ॥
प्रणेतारौ भवन्तौ च सर्व्वस्यास्य भविष्यतः ।
पाताले देवलोके च भूर्लोके चैव पन्नगौ ॥
इत्युक्ता सा तदा देवी सर्व्वजिह्वा सरस्वती ।
जगामादर्शनं सद्यो नागस्य कमलेच्छया ॥”
इति मार्कण्डेयपुराणम् ॥

कालियवंशनागहनने दोषो यथा,—
“मद्वंशजातान् सर्पांश्च हन्ति यो मानवाधमः ।
ब्रह्महत्यासमं पापं भविता तस्य निश्चितम् ॥
मत्पादपद्मचिह्ने यः करोति दण्डताड़नम् ।
द्विगुणं ब्रह्महत्याया भविता तस्य किल्बिषम् ॥
लक्ष्मीर्यास्यति तद्गेहात् शापं दत्त्वा सुदारुणम् ।
वंशायुर्यशसां हानिर्भविता तस्य निश्चितम् ॥
श्वं वर्षशतं कालसूत्रं यास्यति मत्क्रिया ॥”
इति ब्रह्मवैवर्त्तपुराणे श्रीकृष्णजन्मखण्डे १९ अः ॥

वास्तुनागशुद्धिर्यथा,—
“वास्तुप्रमाणेन तु गात्रकेण
वामेन शेते खलु नित्यकालम् ।
त्रिभिस्तु मासैः परिवृत्य पार्श्वं
तं वास्तुनागं प्रवदन्ति सिद्धाः ॥
भाद्रादिके वासवदिक्शिराः स्या-
न्मार्गादिकेषु त्रिषु याम्यमूर्द्धा ।
प्रत्यक्शिराः स्यात् खलु फाल्गुनादौ
ज्यैष्ठादिकौवेरशिराः स नागः ॥
मूर्द्ध्नि घाते भवेन्मृत्युः पृष्ठे स्यात् पुत्त्रभार्य्ययोः ।
जघनेऽर्थक्षयं विद्यात् सर्व्वसम्पत्तथोदरे ॥
एकं नागोड़ुसंशुद्धौ द्वे चेद्दक्षिणपश्चिमे ।
त्रिशालं पूर्व्वतो हीनं कुर्य्याद्वा सौम्यवर्ज्जितम् ॥
केचिद्दक्षिणभागे तु वदन्त्येकं गृहं बुधाः ।
न कोणेषु गृहं कुर्य्यान्नाप्यन्त्ये नापि मध्यतः ॥
कोणे च धनहानिः स्यादन्ते रिपुभयं भवेत् ।
मध्ये च सर्व्वनाशः स्यात्तस्मादेतद्विवर्ज्जयेत् ॥”
इति ज्योतिस्तत्त्वम् ॥

नागकन्दः, पुं, (नाग इव कन्दं मूलं यस्य । दृढ़मूलत्वादेव तथात्वम् ।) हस्तिकन्दः । इति राजनिर्घण्टः ॥

नागकर्णः, पुं, (नागकर्ण इव आकृतिः पर्णेऽस्यस्येति । अच् ।) रक्तैरण्डः । इति राजनिर्घण्टः ॥

नागकिञ्जल्कं, क्ली, (नागस्येव किञ्जल्को यस्य ।) नागकेशरपुष्पम् । इति राजनिर्घण्टः ॥

नागकुमारिका, स्त्री, (नागस्य कुमारीव । कन् टाप् पूर्व्वह्रस्वश्च ।) गुड़ूची । मञ्जिष्ठा । इति राजनिर्घण्टः ॥

नागकेशरः, पुं, (नागस्येव केशरोऽस्य ।) नागकेसरवृक्षः । इति भरतः ॥ (यथा, हारीते चिकित्सितस्थाने १० अध्याये ।
“नलशैलेयकं पृक्का पद्मकं नागकेशरम् ॥”)

नागकेसरः, पुं, (नागस्येव केसरो यस्य ।) पुष्पवृक्षविशेषः । नागेश्वर इति भाषा ॥ तत्पर्य्यायः । चाम्पेयः २ केसरः ३ काञ्चनाह्वयः ४ । इत्यमरः । २ । ४ । ६५ ॥ केशरः ५ नागकेशरः ६ । इति भरतः ॥ किञ्जल्कः ७ नागकिञ्जल्कः ८ नागीयः ९ काञ्चनम् १० सुवर्णम् ११ हेमकिञ्जल्कः १२ रुक्मम् १३ हेम १४ पिञ्जरः १५ फणिकेसरः १६ पन्नगकेसरः १७ । तत्पुष्पगुणाः । अल्पोष्णत्वम् । लघुत्वम् । तिक्तत्वम् । कफवस्तिवातामयकण्ठशीर्षरोगनाशित्वञ्च । इति राजनिर्घण्टः ॥ तन्नामगुणाः ।
“नागपुष्पः स्मृतो नागः केसरो नागकेसरः ।
चाम्पेयो नागकिञ्जल्कः कथितः काञ्चनाह्वयः ॥
नागपुष्पं कषायोष्णं रूक्षं लघ्वामपाचनम् ।
ज्वरकण्डूतृषास्वेदच्छर्द्दिहृल्लासनाशनम् ॥
दौर्गन्ध्यकुष्ठवीसर्पकफपित्तविषापहम् ॥”
त्रिजातकं नागकेशरसंयुक्तं चतुर्ज्जातकं भवति यथा,—
“त्वगेलापत्त्रकैस्तुल्यैस्त्रिसुगन्धिस्त्रिजातकम् ।
नागकेशरसंयुक्तं चतुर्ज्जातकमुच्यते ॥
तद्द्वयं रोचकं रूक्षं तीक्ष्णोष्णं मुखगन्धहृत् ।
लघु पित्ताग्निकृद्वर्ण्यं कफवातविषापहम् ॥”
इति भावप्रकाशः ॥

नागगन्धा, स्त्री, (नागस्य गन्ध इव गन्धो यस्याः ।) नाकुलीकन्दः । इति राजनिर्घण्टः ॥ (नाकुलीशब्देऽस्या विशेषो ज्ञातव्यः ॥)

नागगर्भं, क्ली, (नागः सीसकं गर्भं उत्पत्तिकारणं यस्य ।) सिन्दूरम् । इति राजनिर्घण्टः ॥

नागच्छत्रा, स्त्री, (नागस्य फणेव छत्त्रं छादनं पत्त्रे यस्याः ।) नागदन्ती । इति राजनिर्घण्टः ॥

नागजं, क्ली, (नागात् सीसकात् जायते इति । जन + डः ।) सिन्दूरम् । इति राजनिर्घण्टः ॥ रङ्गम् । इति हेमचन्द्रः । ४ । १०८ ॥ नागजाते, त्रि ॥

नागजिह्वा, स्त्री, (नागस्य सर्पस्य जिह्वेव ।) शारिवा । अनन्तमूलम् । इति रत्नमाला ॥

नागजिह्विका, स्त्री, (नागस्य जिह्वेव रक्तता यस्याः । कप् । टापि अत इत्वम् ।) मनःशिला । इत्यमरः । २ । ९ । १०८ ॥ (यथास्याः पर्य्यायः ।
“मनःशिला मनोगुप्ता मनोह्वा नागजिह्विका ।
नैपाली कनटी गोला शिला दिव्यौषधिः स्मृता ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

नागजीवनं, क्ली, (नागः सीसकं जीवनं यस्य ।) वङ्गम् । इति हेमचन्द्रः । ४ । १०८ ॥

नागदन्तः, पुं, (नागस्य गजस्य दन्तः ।) हस्तिदन्तः । (यथा, महाभारते । १२ । ९८ । १९ ।
“द्वीपिचर्म्मावनद्धश्च नागदन्तकृतत्सरुः ॥”
नागदन्तः साधनत्वेनास्त्यस्येति अच् ।) गृहान्तर्गतदारु । इति मेदिनी । ते, २०१ ॥ दाँलिया इति दाण्डा इति च भाषा ॥

नागदन्तकः, पुं, (नागदन्त + स्वार्थे कन् ।) नागदन्तः । (नागदन्तेन कायतीति । कै + कः ।) भित्तिदारुद्वयम् । तत्पर्य्यायः । निर्यूहः २ । इति जटाधरः ॥

नागदन्तिका, स्त्री, (नागस्य सर्पस्य दन्त इव पीड़ादायकं पत्त्रं यस्याः । कापि अत इत्वम् ।) वृश्चिकाली । इति रत्नमाला ॥ विछिटी इति भाषा ॥

नागदन्ती, स्त्री, (नागस्य गजस्य दन्त इव फलाद्याकारे यस्याः । ङीष् ।) कुम्भा । श्रीहस्तिनी । इति मेदिनी । ते, २०१ ॥ हातिशुण्डा इति भाषा ॥ शेषस्य पर्य्यायः । विशल्या २ पर्व्वपुष्पी ३ विषौषधी ४ शुक्लपुष्पा ५ इभदन्ताह्वा ६ काण्डेरी ७ कामदूतिका ८ । इति रत्नमाला ॥ श्वेतपुष्पा ९ मधुपुष्पा १० विशोधिनी ११ नागस्फोता १२ विशालाक्षी १३ नागच्छत्रा १४ विचक्षणा १५ सर्पपुष्पी १६ शुक्लपुष्पी १७ स्वादुका १८ शतदन्तिका १९ सितपुष्पी २० सर्पदन्ती २१ नागिनी २२ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । रूक्षत्वम् । वातकफगुल्मशूलोदरव्याधिकण्ठदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥

नागदमनी, स्त्री, (नागो दम्यतेऽनयेति । दम + ल्युट् + ङीप् ।) क्षुद्रक्षुपविशेषः । तत्पर्य्यायः । जम्बूः २ जाम्बवती ३ वृका ४ रक्तपुष्पा ५ जाम्बवी ६ मलघ्नी ७ दुर्द्धर्षा ८ दुःसहा ९ । अस्या गुणाः । तिक्तत्वम् । उष्णत्वम् । कटुत्वम् । त्रिदोषोदराध्मानदोषनाशित्वम् । कोष्ठशोधनकारित्वञ्च । इति राजनिर्घण्टः ॥*॥ तन्नामगुणाः ।
“विज्ञेया नागदमनी बला मोटा विषापहा ।
नागपुष्पी नागपत्त्रा महायोगेश्वरीति च ॥
बला मोटा कटुस्तिक्ता लघुः पित्तकफापहा ।
मूत्रकृच्छ्रव्रणान् रक्षो नाशयेज्जालगर्द्दभम् ॥
सर्व्वग्रहप्रशमनी निःशेषविषनाशिनी ।
जयं सर्व्वत्र कुरुते धनदा सुमतिप्रदा ॥”
इति भावप्रकाशः ॥

नागदलोपमं, क्ली, (नागदलस्य ताम्बूल्या उपमा यत्र ।) परूषफलम् । इति रत्नमाला ॥ (परूषशब्देऽस्य गुणादयो ज्ञातव्याः ॥)

नागद्रुः, पुं, (नागप्रियो द्रुर्वृक्षः ।) समन्तदुग्धा । इति शब्दचन्द्रिका ॥ सिज इति भाषा ॥

नागनिर्य्यूहः, पुं, (नाग इव निर्य्यूहो नागदन्तः ।) नागदन्तकः । इति जटाधरः ॥

नागपञ्चमी, स्त्री, (नागप्रिया पञ्चमी । शाकपार्थिवादिवत् समासः ।) आषाढ़ी कृष्णा पञ्चमी । तत्र मनसापूजा कर्त्तव्या । यथा,—
“देवीपुराणे ।
‘सुप्ते जनार्द्दने कृष्णे पञ्चम्यां भवनाङ्गने ।
पूजयेन्मनसादेवीं स्नुहीविटपसंस्थिताम् ॥
पद्मनाभे गते शय्यां देवैः सर्व्वैरनन्तरम् ।
पञ्चम्यामसिते पक्षे समुत्तिष्ठति पन्नगी ॥’
मनसादेवीं विषहरीम् । स्नुही सिजवृक्षः । देवैरिति सहार्थे तृतीया ।
‘देवीं सम्पूज्य नत्वा च न सर्पभयमाप्नुयात् ।
पञ्चम्यां पूजयेन्नागाननन्ताद्यान् महोरगान् ॥